# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -आचार्यद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ३** | गुणाः - ७० |
| विषयः - वेदः | (C.C.- 5.3.8. Old & New ) | |
| दिनाङ्कः - ०६/१२/२०१८ | *ऋग्वेदभाष्यभूमिका (सायणकृता) ।* | समयः -१०.०० तः ०१.०० |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नेषु एकः व्याख्यायताम् -** **( ५ )**

*(१) यस्य निःश्वसितं वेदा ये वेदेभ्योऽखिलं जगत् ।*
*निर्ममे तमहं वंदे विद्यातीर्थं महेश्वरम् ॥*

*(२) आध्वर्यवस्य यज्ञेषु प्राधान्याद् व्याकृतः पुरा ।*
*यजुर्वेदोऽथ होत्रार्थम् ऋग्वेदो व्याकरिष्यते ॥*

**प्रश्नः २ ऋग्वेदभाष्यभूमिकायाः परिचयो देयः ।** **( १० )**

**अथवा**

**ऋग्वेदभाष्यभूमिकानुसारं परिसंख्याविधिं वर्णयत ।**

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नाङ्कितेषु एकः व्याख्यायताम् ।** **( ५ )**

*(१) अर्थवादो वा ।*

*(२) अविरुद्धं परम् ।*

**प्रश्नः ४ ग्रन्थोक्तदिशानुसारं ब्राह्मणभागस्य प्रामाण्यं विवेचयत ।** **( १० )**

**( अथवा )**

**ऋग्वेदभाष्यभूमिकानुसारं वेदस्य अपौरुषेयेत्वं प्रतिपादयत ।**

**तृतीयान्वितिः**

**प्रश्नः ५ निम्नाङ्कितेषु एकः व्याख्यायताम् ।** **( ५ )**

*(१) विधिशब्दाच्च ।*

*(२) अजाक्षीरेण जुहोति ।*

**प्रश्नः ६ ग्रन्थानुसारं मन्त्रब्राह्मणयोः स्वरूपं वर्णयत ।** **( १० )**

**( अथवा )**

**ऋग्वेदभाष्यभूमिकानुसारं अनुबन्धचतुष्टयं निरूपयत ।**

**चतुर्थान्वितिः**

**प्रश्नः ७ निम्नेषु एकस्य व्याख्या विधेया ।** **( ५ )**

*(१) तथा फलाभावात् ।*

*(२) मन्त्रोहीनः स्वरतो वर्णतो वा ।*

**प्रश्नः ८ ऋग्वेदभाष्यभूमिकानुसारं वेदाङ्गानां निरूपणं कृत्वा तेषु व्याकरणस्य महत्त्वं प्रतिपादयत ।** **( १० )**

**अथवा**

**ग्रन्थोक्तदिशानुसारं पुराणानां प्रयोजनं विवेच्यताम् ।**

**प्रश्नः ९ निम्नाङ्कितेषु दशानां लघूत्तराणि लिखत ।** **( १० )**

*(१) ऋग्वेदभाष्यभूमिकायाः आद्य रचयिता कः ?*

*(२) परिसंख्यायां कति दोषाः भवन्ति ? के च ते ?*

*(३) सायणाचार्यस्य पितुः नाम किम् ?*

*(४) ग्रन्थस्य मंगलाचरणे कयोः प्रार्थना विद्यते ?*

*(५) यजुर्वेदस्य ऋत्विक् कः वर्तते ?*

*(६) षडङ्गेषु शिक्षा वेदपुरुषस्य किमङ्गम् ?*

*(७) सायणाचार्यस्य गुरोः नाम किम् ?*

*(८) ऋग्वेदस्य मंत्राणाम् अपरं नाम किम् ?*

*(९) ब्रह्मयज्ञ अर्थात् किम् ?*

*(१०) सायणाचार्येण सर्वप्रथमं कस्य वेदस्य व्याख्यानं कृतम् ?*

*(११) शम्भुमते कति वर्णाः ?*

*(१२) उद्गाता कस्य वेदस्य ऋत्विक् वर्तते ?*

*(१३) 'अध्वर्युः' शब्दस्य कोऽर्थः ?*

*(१४) वेदाङ्गानि कति सन्ति ?*

*(१५) 'प्रवाहणिः' शब्दस्य कोऽर्थः ?*

--००--